# ५. अहं, त्वम् ।

## ५.१ अहम्



अहं बालकः अस्मि ।
अहं प्रभाते स्नानं करोमि ।
अहं मध्याह्ने शालां गच्छामि ।
अहं सायङ्काले खेलामि ।
अहं रात्रौ निद्रां करोमि ।



अहं बालिका अस्मि ।
अहं प्रातराशं खादामि ।
अहं प्रभाते शालां गच्छामि ।
अहं मध्याह्ने स्वाध्यायं करोमि ।
अहं सायङ्काले गीतं गायामि ।

- **कृतिः-** छात्रः स्वदिनचर्यां पञ्चषड्वाक्येषु वदति ।

## ५.२ त्वम्

शिक्षिका - त्वं कुत्र वससि?
छात्रः - अहं नाशिकनगरे वसामि ।
शिक्षिका - त्वं कदा खेलसि?
छात्रः - अहं सायङ्काले सपादसप्तवादने खेलामि ।
शिक्षिका - तर्हि कदा अध्ययनं करोषि?
छात्रः - रात्रौ दशवादनपर्यन्तम् अध्ययनं करोमि ।
शिक्षिका - त्वं सम्यक् गायसि । चित्रमपि सुन्दरम् आलिखसि । अध्ययनम् अपि करोषि । सत्यमेव त्वम् आदर्शः बालकः ।

TBAB89


- **कृतिः-** एकः छात्रः अन्यं छात्रं प्रश्नं पृच्छति । अन्यः छात्रः उत्तरं वदति। 'त्वं कुत्र वससि? त्वं किं करोषि?' एवं छात्राः परस्परं प्रश्नं कुर्वन्ति । उत्तरं वदन्ति च ।

### भाषाभ्यासः

**अहम्/त्वम् इति शब्दं योजयत ।**

१. ______ खेलामि । २. ______ धावसि । ३. ______ पठसि ।
४. ______ पश्यामि । ५. ______ कूर्दसि । ६. ______ हसामि ।

## ५.३ आवाम्, वयम्



आवां लिखावः ।



वयं लिखामः ।




आवां लिखावः ।



वयं धावामः ।

- **कृतिः-** एकः छात्रः वाक्यं वदति (अहं गच्छामि ।), अनन्तरं बालकद्वयम् 'आवां' शब्देन (आवां गच्छावः।), अन्ये बालकाः 'वयं' शब्देन (वयं गच्छामः ।) इति बहुवचनं वदन्ति । तथैव अन्ये छात्राः ।

### ५.४ युवां, यूयम्



त्वं पश्यसि ।



युवां पश्यथः ।



यूयं पश्यथ ।

## भाषाभ्यासः

**१. योग्यं पर्यायं चिनुत लिखत च ।**

१. अहम् ________ । (उपविशामि/उपविशामः)
२. ________ क्रीडामः । (अहं/वयं)
३. वयं ________ । (भ्रमामि/भ्रमामः)
४. वयं ________ । (नमामि/नमामः)
५. ________ हसामि । (अहं/वयं)
६. ________ वदसि । (त्वं/यूयं)
७. ________ क्षिपथ । (त्वं/यूयं)
८. ________ नृत्यसि । (त्वं/यूयं)
९. ________ लिखथः । (त्वं/युवां)
१०. यूयं ________ । (पठसि/पठथ)

## ६. श्रवणाभ्यासः

IBJ79H

वाचनम् ⟶ श्रवणम् ⟶ अनुवाचनम् ⟶ अवबोधनम्

• **कृतिः–** शिक्षकः कथां कथयति । छात्राः शृण्वन्ति, अवगच्छन्ति, माध्यमभाषया पुनः वदन्ति ।

### सत्यप्रियः काष्ठिकः ।



एकः काष्ठिकः काष्ठच्छेदनार्थं वनं गच्छति । अनवधानात् तस्य हस्तात् कुठारः जले पतति । सः चिन्ताकुलः भवति । तदा तत्र देवः आगच्छति । देवः जले मज्जति । सुवर्णकुठारं गृहीत्वा बहिः आगच्छति । सः वदति, "अपि एषः तव कुठारः ?" काष्ठिकः वदति– "न एषः मम कुठारः ।" तदनन्तरं देवः रौप्यकुठारं दर्शयति । काष्ठिकः तदपि न स्वीकरोति । अन्ते देवः लोहकुठारम् आनयति । काष्ठिकः वदति, "आम्, एषः एव मम कुठारः ।" प्रसन्नः देवः तस्मै सर्वान् कुठारान् यच्छति । अहो काष्ठिकस्य निःस्पृहता सत्यप्रियता च !